# नाट्यरङ्गे ध्वनिसिद्धान्तस्य प्रभाव: व्यङ्ग्यव्याख्यामधिकृत्य एकं अध्ययनम् ||

**Sarikrishna S.**

Assistant Professor, Department of Languages- Sanskrit, JAIN (Deemed-to-be University), Bangalore.

DOI: https://doi.org/10.5281/zenodo.15796185

## ABSTRACT:

काव्यशास्त्राचार्येषु आनन्दवर्धन: तस्य ध्वनिसिद्धान्तश्च प्रचुरप्रचार: | तेन ग्रथित: ध्वन्यालोकग्रन्थ: भारतीय काव्यशास्त्रस्य मकुटस्थाने स्थित: | ग्रन्थोऽयं काव्यस्य आत्मा ध्वनिरिति समर्थितम् | ध्वने: निरूपणेन काव्यसमीक्षाजगति नूतनयुगस्य आरंभमेव समायातः| प्रतीयमानार्थस्य प्राधान्यं यस्मिन् काव्ये चमत्कारिरूपेण दृश्यते तदेव ध्वनिकाव्यम् |अयमर्थस्तु सहृदयहृदयानानन्दयति | ये तु वस्त्वलंकाररसरूपेण त्रिविधो भवति|तेषु रसध्वनि: महानीयतमोमन्यते | आनन्दवर्धनेन रसस्य ध्वनेश्च पारस्परिकसंबन्ध: च विशदीकृत: | रसस्तु सदा व्यङ्ग्य:| रसध्वने: चारुत्वाहेतुत्वात् काव्ये तथा नाट्ये तस्योपयोग: सहृदयान् आनन्दयति | आनन्दवर्धनस्तु श्रव्यकाव्यमनुसृत्येव ध्वनि: प्रस्तावित: | प्रायोगिक रूपेण ध्वने: प्रयोग: तदनन्तरकालीन कुलशेखरवर्मणा एव कृत: | स तु चेर साम्राज्यस्य प्रमुख: राजा तथा कवि: आसीत् | तेन महाभारतेतिवृत्तं आश्रित्य विरचित: सुभद्राधनञ्जयम् तथा तपतीसंवरणम् इति नाटकद्वयौ ध्वनिसिद्धान्तप्रयोगेन एव कृत: | ध्वनियुक्तनाटकद्वयौ इति विशेषणेन रङ्गावतरणार्थं नवीन अभिनय प्रयोगोऽपि समन्वितम् | ते तु धनञ्जयध्वनि तथा संवरणध्वनीति नाम्ना प्रसिद्ध : | ये द्वे संस्कृत भाषाया: प्रथम रङ्गपाठ: इति मन्येते | गणपतिशास्त्रि महाभागेन ये द्वे ग्रन्थौ मिलित्वा व्यङ्ग्यव्याख्या इति एकसंज्ञां कृत: | प्रस्तुत लेखनं नाट्यरङ्गे ध्वनिसिद्धान्तस्य प्रभाव:- व्यङ्ग्यव्याख्यामधिकृत्य एकं अध्ययनम्, मुख्यतया नाट्ये ध्वने: प्रयोगमार्गाणि तथा व्यङ्गार्थाभिनयसंकेता:, दृश्यकाव्ये व्यङ्ग्यव्यञ्जक सन्निवेश:, केरलीय रङ्गावतरणे ध्वने: प्रभाव: इत्यादि विषयानधिकृत्य व्यङ्ग्यव्याख्यां पुरस्कृत्य प्रतिपादित:|

**KEYWORDS:**

ध्वनि, व्यङ्ग्यव्याख्या, नाट्यं, रसध्वनि:, काव्यम्.

**आमुखम् |**

संस्कृतनाटकं सर्वदा प्रदर्शनदृष्ट्या तथा प्रायोगिकाऽर्थात् च प्रसिद्ध: | सहृदय-अनुभवानां भावेन तथा विभावानुभाव व्यभिचारिभावेन रसं उत्पादयितुं नाट्यरङ्गोऽयं समर्थ: | साहित्यरूपे नाटक कर्तृत्वं अत्यन्तं उत्कृष्ठमेव | 'नाटकान्तं कवित्वं' इत्यपि ख्याति: | भरतमुने: नाट्यशास्त्रादारभ्य नाट्यरङ्गप्रयोगानधिकृत्य विविध संवादा: प्रचालिता:| अभिनवगुप्त: अभिनवभारत्यां नाट्ये रसस्य प्राधान्यमधिकृत्य विस्तरेण व्याख्यान: कृत: | अभिनवगुप्तस्तु ध्वन्यालोकस्य 'लोचन'व्याख्याकार: एव | स: तु रस: तथा ध्वने: प्राधान्यं अङ्गीकरोति | नाट्यशास्त्रस्य षष्ठ अध्यायादारभ्य चतुर्दश अध्यायपर्यन्तं रस, भाव, अभिनय-सूक्ष्माभिनय, हस्ताभिनय, आदि विस्तररूपेण प्रतिपादनम् कृत: | तत्रापि चतुर्दशोऽध्याये प्रवृत्तिधर्मव्यञ्जनामधिकृत्य निरूपित:| लोकधर्मी -नाट्यधर्मी रूपकानां निरूपणमपि अत्र मुख्यरूपेण कृत:|नाट्यशास्त्रस्यव्याख्यानेषु अभिनवभारत्येकयेव समुपलभ्यते |

काव्यशास्त्राचार्येषु आनन्दवर्धन: तस्य ध्वनिसिद्धान्तश्च प्रचुरप्रचार: | तेन ग्रथित: ध्वन्यालोकग्रन्थ: भारतीय काव्यशास्त्रस्य मकुटस्थाने स्थित: | ग्रन्थोऽयं काव्यस्य आत्मा ध्वनिरिति समर्थितम् | ध्वने: निरूपणेन काव्यसमीक्षाजगति नूतनयुगस्य आरभमेव समायातः| प्रतीयमानार्थस्य प्राधान्यं यस्मिन् काव्ये चमत्कारिरूपेण दृश्यते तदेव ध्वनिकाव्यम् |अयमर्थस्तु सहृदयहृदयानानन्दयति | ये तु वस्त्वलंकाररसरूपेण त्रिविधो भवति| तेषु रसध्वनि: महानीयतमोमन्यते | आनन्दवर्धनेन रसस्य ध्वनेश्च पारस्परिकसंबन्ध: च विशदीकृत: | रसस्तु सदा व्यङ्ग्य:| रसध्वने: चारुत्वाहेतुत्वात् काव्ये तथा नाट्ये तस्योपयोग: सहृदयान् आनन्दयति | आनन्दवर्धनस्तु श्रव्यकाव्यमनुसृत्येव ध्वनि: प्रस्तावित: |

प्रायोगिक रूपेण ध्वने: प्रयोग: तदनन्तरकालीन कुलशेखरवर्मणा एव कृत: | स तु चेर साम्राज्यस्य प्रमुख: राजा तथा कवि: आसीत् | तेन

महाभारतेतिवृत्तं आश्रित्य विरचित: सुभद्राधनन्जयम् तथा तपतीसंवरणम् इति नाटकद्वयौ ध्वनिसिद्धान्तप्रयोगेन एव कृत: | ध्वनियुक्तनाटकद्वयौ इति विशेषणेन रङ्गावतरणार्थं नवीन अभिनय प्रयोगोऽपि समन्वितम् | ते तु धनञ्जयध्वनि तथा संवरणध्वनीति नाम्ना प्रसिद्ध : | ये द्वे संस्कृत भाषाया: प्रथम रङ्गपाठ: इति मन्येते | गणपतिशास्त्रि महाभागेन ये द्वे ग्रन्थौ मिलित्वा व्यङ्ग्यव्याख्या इति एकसंज्ञां कृत: | प्रस्तुत लेखनं "नाट्यरङ्गे ध्वनिसिद्धान्तस्य प्रभाव:- व्यङ्ग्यव्याख्यामधिकृत्य एकं अध्ययनम्", मुख्यतया नाट्ये ध्वने: प्रयोगमार्गाणि तथा व्यङ्गार्थाभिनयसंकेता:, दृश्यकाव्ये व्यङ्ग्यव्यञ्जक सन्निवेश:, केरलीय रङ्गावतरणे ध्वने: प्रभाव: इत्यादि विषयानधिकृत्य व्यङ्ग्यव्याख्यां पुरस्कृत्य प्रतिपादित:|

**आनन्दवर्धन: |**

आनन्दवर्धनस्तु नवमशताब्द्युत्तरार्धक: काश्मीरवासी कवि: काव्यशास्त्र विचक्षण: तथा दार्शनिकश्च आसीत् | तस्य जीवनकाल जन्मदेशादि विषये पण्डितानां मध्ये विभिन्नाभिप्राया: नास्ति |ध्वन्यालोकग्रन्थस्य तृतीयोद्योतस्य समाप्तभागे तेन नोणसुत: इति विशेषणोऽपि आत्मानं दीयते | अनेन तस्य पितुर्नाम नोण: इति मन्यते | ध्वन्यालोकस्तु तस्य प्रसिद्धग्रन्थ:| तदरिक्त्य तेन काव्यदार्शनिकग्रन्था: अपि आरचयत |अर्जुनचरित:, देवीशतकं, विषमबाणलीलादि त्रीणि काव्यानि, तत्वालोक:, प्रमाणविनिश्चयटीकायाष्टीका आदि दार्शनिकग्रन्थश्च तेन कृत:| ध्वन्यालोकग्रन्थस्य रचानानन्तरं स तु ध्वनिकार: इति नाम्ना काव्यशास्त्र जगति चिरप्रतिष्ठां प्राप्तवान् |

**ध्वन्यालोक: तथा ध्वनि सिद्धान्त: |**

ध्वन्यालोक: आनन्दवर्धनस्य प्रौढ: तथा प्रशस्त: काव्यशास्त्र कृतिरेव | अत्र ध्वनिं काव्यस्य आत्मरूपेण प्रस्तावित: | चतुर्षु उद्योतेषु कारिका , वृत्तय:, उदाहरणानि इति त्रयो विभागेषु ग्रन्थोऽयं आविष्कृत:|अत्र ध्वनिस्थापना, ध्वनि सिद्धान्त:, ध्वनि विरोधिनां मतानि , प्रतीयमानार्थं तथा ध्वनि भेदं, स्वरूपम् , संघटना व्यञ्जकताप्रदर्शनं इत्यादि विषया: विस्तरेण प्रतिपादिता:| ग्रन्थस्य अनेकानि व्याख्यानानि अपि लभ्यते |ध्वन्यालोकानन्तरवर्ती पण्डिता: ध्वनिं अवगन्तुं गभीरपरिश्रमा: एव कृत: | ध्वन्यालोकस्तु ध्वनिं काव्यस्य आत्मरूपेण

प्रतिष्ठाप्य अन्ये काव्यशास्त्र घटकानां समन्वयमपि ध्वनिना सार्धं संयोजियति |

ध्वनिकारस्तु काव्यशास्त्रलोके नवीनमेकं युगस्य प्रारम्भ: ध्वनि सिद्धान्त प्रस्तावनेन निरूपित: | तस्य मते काव्ये मुख्यतया द्वावर्थौ भवत:| ते तु वाच्यार्थ: तथा प्रतीयमानार्थ :| काव्ये प्रतीयमानार्थ: सौन्दर्यचमत्कारादि रूपेण अभिव्यन्ज्यमान: भवती चेत् तत्काव्यं ध्वनिकाव्यमिति वक्तुं शक्यते |ध्वने: पूर्वमपि काव्यशास्त्रे रस-रीति-अलङ्कारादि सिद्धान्ता: आसीत् , ते तु अङ्गभूतान्येव भवन्तीति, तदतिरिक्त्य अनिर्वचनीय: एकोरूपोऽस्तीति आनन्दवर्धनेन स्थापितम् | अनन्तरमेव तेन ध्वनिस्थापना कृत: | ध्वने: मूलं तु प्रतीयमानार्थ: एव | तदपि त्रिविध:| रस-अलङ्कार – वस्तुरूपाश्च | तेषु रसध्वनिरेव महनीय: | काव्ये प्रतीयमानार्थस्य चारुत्वं आनन्दवर्धनेन विशादीकृत: | काव्ये तु गुणालङ्काररीत्यादय: तत्वानि उत्कर्षरूपेण एव तिष्ठति | ध्वनिसिद्धान्तस्य प्राचीनता, ऐतिहासिक विकासक्रम: च प्रकट: एव | ध्वन्यालोकस्य त्रितीयोद्योते 'रसादि तात्पर्येण काव्यनिबन्धनं भरतादपि सुप्रसिद्धमेव' (३.३७ ) इत्यपि प्रस्तावित: | तस्य मते रसध्वनिरेव काव्यरचनाया: आत्मा | ध्वनिपदस्य निर्वचनस्तु त्रिधा क्रियते|

ध्वननं ध्वनि:, ध्वन्यत इति ध्वनि:, ध्वनतीति ध्वनि: |

**ध्वनिकाव्य लक्षणम् |**

यत्रार्थ: शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थो

व्यङ्क्त: काव्यविशेष: सध्वनिरिति सूरिभि: कथित: || (ध्व. लो. १.) इति||

प्रतीयमानार्थ: अभिव्यङ्क्त: काव्यविशेष: एव ध्वनि: | सहृदय हृदयाह्लादका: अर्था: अत्र विशेषरूपेण अनुभवितुं शक्यते | यत्र वाच्यार्थात् व्यङ्गार्थस्य अतिशय: भवति तदेव ध्वनिकाव्यम् |अत्र अतिशय: इति चारुत्वोत्कर्ष निबन्धनमेव आश्रयते | आनन्दवर्धन: ध्वन्यालोकस्य समापनभागे एवमुक्तं 'ध्वनिकाव्यं तु स्फुरित्प्रसुप्तकल्पं मनस्तु विदुषाम्' इति|अनेन ध्वनिकाव्यस्य वैशिष्ठ्यं अवगन्तुं शक्यते |

**ध्वनि:- तथा रस:पारस्परिकसम्बन्ध: |**

ध्वनिभेदेषु असंलक्ष्यक्रमव्यङ्ग्यभेद एव रसध्वनिर्भवति | अनेकेषु ध्वनिभेदेषु आनन्दवर्धन: रसध्वनिरेव मुख्यरूपेण प्रतिपादित:| अत्र रसतत्वाद् ध्वनितत्वं श्रेष्ठम् | वस्त्वलङ्काररसेषु, वस्त्वलङ्कारौ वाच्यावपि भवत: व्यङ्गावपि च | रसस्तु सदा व्यङ्ग्य एव |विभावाऽनुभावव्यभिचारिभावादयं व्यज्यते | सहृदयेषु रसप्रतीति: ध्वन्यते सदा| रसप्रतीतिस्तु ध्वन्याश्रयेण एव तिष्ठति |

## नाट्ये ध्वनि:|

भारतीय नाट्यवेदी काव्यात्मकताया: प्रामुख्येन साहित्यानवलम्ब्येव स्थित: | नाटकान्तम् कवित्वं इत्यपि प्रसिद्धोक्ति: | कवित्वं तु कवे: नाटकरचना नैपुण्येन निरूपयति |नाट्ये बाह्यसौन्दर्यमिव आन्तरिक सौन्दर्यस्य प्राधान्यं ध्वनि सन्निवेशेन द्योतयति | ध्वनिकारस्य प्रस्तावना अत्र प्राधान्यमर्हति | यथा –

" प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् |

यत्तद्प्रसिद्धावयवातिरिक्तं विभाति लावन्यमिवाङ्गनासु ||"(ध्व. लो १.४) इति|प्रतीयमानं तु ध्वन्यात्मक सौन्दर्यमेव | तदेव सहृदयान् आह्लादयति | नाट्यरङ्गे मुख्योपेय: रसाविष्करणं तथा रसोद्दीपनमेव |अनौचित्यादृते नान्यद् रसभङ्गस्य कारणमिति ध्वनिकारस्य उक्ति: गुणालङ्काररीतीनां औचित्यसन्निवेशमेव प्रस्तावित: |

## कुलशेखर: |

कुलशेखर: नवम शताब्धीत:कैरलीय: महोदयपुरराजा आसीत्| स: तु केरलकुलचूडामणि:, केरलाधिनाथ:,महोदयपुरपरमेश्वर : इत्यादि नाम्रा प्रसिद्ध:|स: तु भक्तिमार्गस्य वक्ता तथा वैष्णव: च आसीत् |निरूपकाणां मते स: तु चेरसाम्राज्य प्रमुख: कुलशेखरवर्मा एव | कतिपय निरूपकानां मध्ये स: तु स्थाणु रवि कुलशेखर: इति अपि प्रसिद्ध: |शिवराम: इति प्रथित: पण्डित: एव व्याङ्गव्याख्यभाष्यस्य लेखक: इत्यपि पण्डितानां मतम् | केचन तु व्याङ्ग्यव्याख्याया: लेखकस्य मूषिकवंशस्य कर्ता तोलेन सह परिचयं कर्तुं प्रयत्नन्ते । परन्तु तादृशं अनुमानं युक्तं कर्तुं निश्चयात्मकं प्रमाणं नास्ति।कुलशेखरस्तु तपतीसंवरणं. सुभद्राधनञ्जयं, आश्चर्यमञ्जरी(चम्पूकाव्यम् ), विश्चिन्नाभिषेकादीनां कृतीनां रचना कृता:| ध्वनिसिद्धान्त प्रयोग प्रदर्शनमेव नाटके कृत: इति

व्यङ्ग्यव्याख्याया: आमुखे व्याख्याकार: ब्राह्मण: विस्तरेण प्रतिपादित: | तेषु प्रसक्तभागा: यथा – " ध्वनियुक् काव्यसरणि: शास्तेति प्रोच्यते बुधै: |" "एतस्माद् ध्वनियुक्ता सा रचिता नाटक द्वयी | दृष्टव्या भवता सेयं नाट्यलक्षणवेदिना ||" इति | कुलशेखरः नाट्यशास्त्रे ध्वनी-अवधारणां प्रयोजयित्वा इतिहासं रचितवान्।

## तपती संवरणम्, सुभद्राधनञ्जयम् |

तपतीसंवरणनाटके षष्ठोऽङ्काः सन्ति | तपती तथा संवरणस्य प्रणयकथा एव अत्रेतिवृत्तम् | कथावस्तु महाभारतस्य आदिपर्वाद्गृहीतमेव | तपती, सूर्यदेवस्य पुत्री तथा संवरणस्तु हस्तिनपुरराजा च आसीत् | अत्र तृतीयाङ्क पर्यन्तं नायिका नायकानां प्रणयकथाविकास: एव वर्ण्यते | सुर्यदेवस्य अनुमत्या तेषांविवाहः , पुत्रोत्पत्ति, रम्भाया: मायाजालेन तपती जीवनवृत्तान्त: विस्मृता, राक्षसी मोहिनिकाया: संवरणस्य पुत्रं हन्तुं श्रम:, अनन्तरं तपत्या: स्वर्गलोकप्रवेश:, संवरणस्य दुखं , अन्ते त्रयाणां मिलनं आदि विषया: अत्र संनिवेशिता: | अभिनयप्राधान्यत्वेन रस सन्निवेशेन कथासन्दर्भा: व्यङ्ग्यार्थं द्योतितुं समर्थ: दृश्यते |

सुभद्राधनञ्जयनाटके पञ्चाङ्कानि सन्ति | अत्र मुख्य कथावस्तु रूपेण सुभद्राया: अर्जुनस्य च प्रणयवृत्तान्तः एव चित्रीकृत:| अर्जुन- सुभद्रा मिलनं, तयो: अनुराग:, अर्जुनस्य प्रच्छन्न वेष:, कृष्णार्जुन संवाद, सुभद्रापहरणं, अर्जुन – सुभद्रा विवाहं आदय :|नाटकेऽस्मिन् नेत्राभिनय साध्यता तथा मनोधर्माभिनय साध्यता सम्यक् रीत्या दृश्यते|अत्र अर्जुन-सुभद्राप्रणयं कालिदासस्य शाकुन्तलकथां तथा शकुन्तल- दुष्यन्त प्रसङ्गादेव साम्यमपि प्रकटयति | तत्तु कुलशेखरस्य कालिदासभक्तिरेव इति पस्चात्कालीन निरूपकाणां मतम् |

## व्यङ्ग्य व्याख्या - संवरण ध्वनि तथा धनञ्जय ध्वनि |

तपतीसंवरणं तथा सुभद्राधनञ्जय नाटकस्य रङ्गपाठा: कुलशेखरेण एव आविष्कृत: इति मन्यते| केरलदेशे परमेश्वरमङ्गलं इति नाम्ना प्रसिद्ध: ग्रामे पूर्णा नदीतीरे निवसित: ब्राह्मण: एव अस्य नाटकस्य रङ्गपाठादीनां समाहारः कृत: इति नाटकस्य आमुखादेव अवगन्तुं शक्यते|संवरण ध्वनि तथा धनञ्जय ध्वनि मिलित्वा 'व्यङ्ग्यव्याख्या' इति नामधेय: गणपतिशास्त्रिणा एव दत्तम् | अभिनयक्रम:, तथारङ्गपाठक्रम:

अत्र विस्तरेण प्रतिपाद्यते |नाट्य ध्वनि प्रदर्शकग्रन्थ: इति ख्याति: इदंप्रथमतया व्यङ्ग्यव्याख्या कृते एव | व्यङ्ग्यव्याख्याकार: कुलशेखरस्य समकालीन: आसीत् इति मन्यते | कुलशेखर: स्वयमेव् अभिनय प्रयोगा: पण्डितानां पुरत: आविष्कृत: | तद्वीक्ष्य एव व्याख्याकार: लिखित: इति उक्ति: |कुलशेखरेण कृत: रङ्गाभिनय पाठा: यथा आङ्गिक-वाचिक-सात्विक- आहार्याभिनयादय: व्याख्याकार: पण्डित: प्रदर्शनग्रन्थमिव लिखित: | ध्वनिद्योतक शब्दानां, श्लोकानां अभिनयसाधुता तथा व्यङ्ग्यार्थ व्याख्यान निरूपणं च तेन विस्तरेण अत्र संनिवेशिता: |पदानुपद – वाक्यानुवाक्यार्था: सूक्ष्माभिनयेन तथा हस्तपादादीनां, नेत्रादीनां, अङ्ग प्रत्यङ्गादीनां साहाय्येन अत्र निरूपिता: | वाच्याभिनयानन्तरं व्यङ्ग्यार्थ द्योतकार्थं विभिन्न रसभावादय: संयोजित: | अत्र मनोधर्मसाधुताऽपि आविष्कृत: | नाट्यशास्त्रस्य मार्गी तथा प्रादेशिक संप्रदायानां समन्वयं अत्र द्रष्टुं शक्यते |मुख्यतया नाट्ये रसध्वने: साधुता एव कुलशेखरेण तथा व्याख्याकारेण निरूपित: | व्यङ्ग्य व्याख्याया: प्रचारानन्तरं कैरलीय नाट्यरङ्गे देशी कलारूपाणां संयोजने , अभिनय प्रसङ्गे च ध्वने: साधुता सम्यक् रीत्या दृश्यते | एवं कथकेली,कूटियाट्टम्, कृष्णनाट्टम्, कूत्त् आदि नाट्यरूपे ध्वने: अभिनयप्रसङ्गा: संयोजिता: | कूटियाट्टस्य रङ्गपाठा: कुलशेखरस्य ध्वनिग्रन्थानाश्रित्येव विरचित: | केरलीय कलारूपे वाच्य व्यङ्ग्य सूक्ष्माभिनयसाधुता तथा मनोधर्मसाधुता सम्यक् रीत्या उपयुज्यते | कुलशेखरस्तु व्यङ्ग्यव्याख्याया: आविष्कारेण देशी भाषाया: तथा संस्कारस्य प्रचार: अपि कृत: | स: तु नाट्ये प्रादेशिक मलयाल- मनिप्रवाल-द्राविड साहित्यरूपाणां तथा कथासन्दर्भाणां संयोजनमपि कृत: | विदूषक -नटी संभाषणे देशी वाङ्गमयस्य अवान्तरविभागा: अपि प्रस्तुत: | नाट्यस्य मार्गी संप्रदायस्य परिवर्तनमत्र इति द्रष्टुं शक्यते |

मुख्यतया नाट्ये ध्वने: आविष्कार: अभिनय समयाधिक्यमिति हानिः सिद्ध्यति | आधुनिक कालेऽपि पण्डितानां मध्ये अयमभिप्राय: वर्तते | व्यङ्ग्यव्याख्यामनुसृत्य संपूर्णं तपतीसंवरणस्य रङ्गावतरणार्थं ४४ घण्डा: अनिवार्या: इति एन् .पि उन्णी महोदयेन प्रस्तावित: अत्र स्मर्यते | अद्य कूटियाट्ट अवतरणार्थम् प्रसिद्ध कथाभागा: एव कलाकारा: उपयुज्यते | कुलशेखर: संपूर्णरूपेण अभिनयसाधुता, तथा सहृदय-नानालोक इव आस्वादन साधुता च विस्तरेण आविष्कृत: | स: तु भारतीय

नाट्यरङ्गे ध्वने: प्रयोगं, काव्यात्मकता, आस्वादनम् च अनितरसाधारणरीत्या संनिवेश्य निर्देशित: |

**उपसंहार: |**

नाट्यास्वादनस्य मुख्य घटकस्तु प्रतिभासहकारित्वमेवेति वक्तुं शक्यते | सहृदयत्वं, रसिकत्वं, भावना, प्रतिभा, तादात्म्यशक्ति:, शरीर मनस्वस्थता आदय: आस्वादन भेदमनुसृत्येव कल्प्यते | रसज्ञतैव सहृदयत्वमिति ध्वनिकारमतं नाट्यस्य कृतेऽपिवक्तुं शक्यते |काव्ये तथा नाट्ये ध्वनि सिद्धान्तः पूर्णरूपेण प्रतिष्ठामलभत| नाट्ये रसनिष्पत्तिघटकानां समावेशेन तथा विभिन्नाभिनयमार्गेण, सन्धिसंध्यङ्गानां समावेशेन ध्वनि: सञ्जात :| नाट्ये ध्वनिस्तु सूक्ष्माभिनयेन, मनोधर्मादिनाश्च सहृदयास्वादनार्थं निरूपित:| विस्तारिता: कथा संदर्भानां विशकलनं प्रेक्षकप्रीतिमाश्रित्येव तिष्ठति | नाट्ये ध्वनि द्योतनार्थं अनेकमार्गा: आसन् | व्यङ्ग्य व्याख्याया: अध्ययनेन ज्ञातं यत् – नाटके ध्वनिस्तु वैविध्यप्रसङ्गेन समवेशितुं शक्यते | तस्य आधिक्यमपि नाट्यस्य स्वत:सिद्धप्रयोजन व्यतिचलने परिणमते | औचित्यरूपेण ध्वने: सन्निवेश: सर्वान् आनन्दयति | सहृदयकृते तथा नानालोककृते ध्वने: आस्वादनं विभिन्नमेव | देशीकलारूपाणां अभिनयप्रसङ्गाः ध्वने: साधुता मार्गीमपेक्ष्य विस्तरेण उपयुज्यते | कुलशेखर: ध्वने: सन्निवेशार्थं नाटकरचनां कृत्वा तस्या: रङ्गावतरणार्थं स्वयमेव अभिनयक्रमा: सन्निवेश्य पण्डितश्रेष्ठेन तस्या: लेखनं कृत्वा एव व्यङ्ग्यव्याख्या अद्य काव्यजगति विराजते | कवि:, सहृदय: नाटककर्ता , अभिनेता, मुख्य तथा सहनटा:, अन्ये कथापात्रा:, आख्याता आदि सर्वेषां प्रकटनमत्र सन्निवेशिता: दृष्यते | केरलकलारूपे तथा प्रादेशिनाट्यरङ्गे ध्वने: स्वाधीनं कुलशेखरानन्तरमेव प्रकट: | संस्कृत नाटकरङ्काविष्कार: ‘कूटियाट्टम्’ ध्वने: साधुता संयक् रीत्या प्रयुज्यते | तपती संवरणम्, सुभद्राधनञ्जयम् कूटियाट्टावतरणं व्यङ्ग्यव्याख्यामाश्रित्येव कृत: |अभिनय प्रसङ्गे प्रादेशिक भाषा तथा साहित्यानपि सन्निवेशितुं रङ्गापाठोऽयं व्यवस्था कृता दृश्यते | मुख्यतया सूत्रधार- विदूषक संभाषणे मणिप्रवाल तथा प्राचीनमलयालस्य स्वाधीनम् | अन्ये कथकली, कृष्णनाट्टम् आदि देशीकलारूपाण्यपि ध्वने: स्वाधीनं प्रकटयते | स्फुरित्प्रसुप्तकल्पं ध्वने: अस्तित्वं नाट्यलोकेऽपि अनुभववेद्य: एव||

## Reference:


1. आचार्य जगन्नाथ पाठक (२००३) ध्वन्यालोक: |(प्रकाश हिन्दी व्याख्योपेत: ) वाराणसी, चौखम्बा विद्याभवन |
2. आचार्य विश्वेश्वर सिद्धान्त शिरोमणि (२००९)ध्वन्यालोक: |वाराणसी, ज्ञानमण्डल लिमिटेड |
3. गङ्गासागर राय:| (२०१०)ध्वन्यालोक: |वाराणसी, चौखम्बा विद्याभवन |
4. जयकृष्णदास गुप्ता | (१९३७)ध्वन्यालोक: |(दीधिति व्याख्या )विद्याविलास प्रेस्स|
5. नीलकण्ठ शास्त्री | (१९८१) ध्वन्यलोकोज्जीवनी | तिरुवनन्तपुरम्, केरलविश्वविद्यालय: |
6. पुरुषोत्तमशर्मा चातुर्वेद:| ( १९५४) ध्वन्यालोकसार:| बनारस चौखम्बा संस्कृत सीरीस् |
7. रामसागर त्रिपाठी | (१९८१) ध्वन्यालोक: |( तृतीय एवं चतुर्थ उद्योत:) वाराणसी, मोतीलाल् बनारसीदास |
8. Raja, Kunjunni K.(1980) The Contribution of Kerala to Sanskrit Literature. University of Madras.
9. Raja, Kunjunni K. (2000). Indian theories of meaning. 2nd ed. Chennai, India. The Adyar Library and Research Centre.
10. Tripathi, K. D. (1995). From sensuous to super sensuous: Some terms of Indian aesthetics. Retrieved on 7 July 2007, from http://ignca.nic.in/ps_03008.htm



**Funding:**

This study was not funded by any grant.


**Conflict of interest:**

The Authors have no conflict of interest to declare that they are relevant to the content of this article.

**About the License:**

© The Authors 2024. The text of this article is open access and licensed under a Creative Commons Attribution 4.0 International License.